# Shri Pada Stava

# શ્રીપાદસ્તવઃ

## Document Information

Text title : Shri Pada Stava

File name : shrIpAdastavaH.itx

Category : devii

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# Shri Pada Stava

## શ્રીપાદસ્તવઃ

ભૂમેરામોદનાથ પ્રદિશતિ નિભૃતસ્મેરમીક્ષાવિશેષં
શેષોપાન્તસ્થિતાયાઃ કમિતરિ ભગવત્યન્તરુજ્જૃમ્ભમાણં
કોપં સાપત્ન્યલભ્યં વિગમયિતુમુપાદાય હસ્તૈશ્ચતુર્ભિ-
ર્નીન્તં તેન સ્વમૂર્ધ્નિ પ્રદિશતુ કુશલં પાદપદ્મં રમાયાઃ ॥ ૧॥

રેખાભિર્યત્ સિરાભિઃ કિસલયમિવ કલ્પદ્રુમસ્યોપગૂઢં
લેખાનાં શેખરત્વં ગતમત ઇવ યદ્યચ્ચ શોણપ્રકાશમ્ ।
પાદદ્વન્દ્વં રમાયાઃ પ્રણતજનમનઃ કામિતાર્થપ્રદં તદ્
દારિદ્ર્યં દારયેન્નઃ કુસુમસમરુચા ભાસમાનં નખાલ્યા ॥ ૨॥

સિક્તં રક્તૈરિવ સ્વૈર્વપુરુરગપતેર્વિશ્વરૂપસ્ય વિષ્ણો-
રધ્યાસોદ્ભૂતસમ્મર્દનદલિતકૃતચ્છિદ્રચર્માન્તવાન્તૈઃ ।
શોણીકુર્વન્તિ ભાસઃ શશરુધિરનિભા યત્પ્રસૂતાઃ પ્રસૂત્યૈ
ભૂયાદ્ ભૂયઃ સમૃદ્ધ્યૈર્જલનિધિજનુષઃ પાદપઙ્કેરુહં નઃ ॥ ૩॥

આદાવામૃશ્યમાનં કિસલયરુચિભિઃ કેશવસ્યાઙ્ગુલીભિઃ
પશ્ચાદાચુમ્બ્યમાનં મૃદુ મૃદુમુખપદ્મેન શોણાધરેણ ।
ભૂયશ્ચાલિઙ્ગ્યમાનં દૃઢતરમુરસિ પ્રાપયદ્ભ્યાં કરાભ્યાં
ભૂયાદ્ ભૂત્યૈ ચિરં નઃ શિરસિ વિનિહિતં પાદપદ્મં રમાયાઃ ॥ ૪॥

ક્ષિપ્તં ક્ષીરામ્બુરાશેસ્તટભુવિ પયસાં ફેનપુઞ્જાવૃતાયાં
કેલીસઞ્ચારકાલે ભસિતપરિવૃતાઙ્ગારવદ્ યદ્ વિભાતિ ।
તન્નઃ સમ્મૃજ્યમાનં નમદમરવધૂમૌલિભિઃ પાદપદ્મં
શ્રીદેવ્યાઃ શ્રેયસે સ્તાત્ પ્રણતિગતિભયાપદ્રવત્કાન્તહસ્તમ્ ॥ ૫॥

વક્ષસ્યક્ષીણરાગં નિદધતિ દયિતે કુઙ્કુમેનેવ લિપ્તં
કુર્વન્તી કાન્તિરેતત્ સુભગયતિતરાં યત્પ્રસૂતા નિતાન્તમ્ ।
મૂર્ધન્યેનં ચ રત્નામ્બરરચિતશિરશ્છાદનેનેવ ગુપ્તં
ભાર્ગવ્યા ભર્ગમુખ્યૈઃ પરિણુતમવતાત્ પાદપદ્મં સદા નઃ ॥ ૬॥

અબ્ધેર્જાતા પ્રવાલાવલિરિતિ મુનિભિર્દૈવતૈસ્તત્ર સંસ્થા-
    દુત્પન્ના કલ્પવૃક્ષાદિતિ દિતિતનયૈર્બાડવાગ્નેઃ શિખેતિ ।
નાનાનધ્યાગમાસાદિતમરુણપયોજન્યમિત્યન્યલોકૈ-
    ર્વ્યાદુત્પ્રેક્ષ્યમાણં પદકમલયુગં પદ્મજાયાશ્ચિરં નઃ ॥ ૭॥

શ્રીપાદસ્તવમેતદ્ યે પઠન્તિ પ્રાતરુત્થિતાઃ ।
અષ્ટૈશ્વર્યં ભવેત્ તેષામાશ્વૈવ હિ ન સંશયઃ ॥ ૮॥

ઇતિ શ્રીશ્રીપાદસ્તવઃ સમાપ્તઃ ।

સ્તોત્રસમુચ્ચયઃ ૨ (૮૮)

Proofread by Rajesh Thyagarajan

---

*Shri Pada Stava*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*